श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीस्तोत्रम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

मातः ! कोमलवल्लि ! मन्मन इदं युष्मत्कटाक्षाभिधं
भृङ्गं वाञ्छति झङ्कृतिः परतरा यस्येदृशी राजते।
अन्योन्यं धनहेमसङ्गतिवशादस्मन्मनःकर्णयो -
रानन्दं ददती झणज्झणदिति प्रक्रान्तलीलारसा॥ 1॥

जननि ! कोमलवल्लि ! कृपानिधे !
जनमिमं कृपणं शरणागतम्।
सकलतापनिवारणलम्पटै -
स्सकृदिव स्नपयस्व विलोकनैः॥ 2॥

क्षीराम्भोधौ जनकसदने भासि कान्तेन मातः !
कामं चास्मिन् कनकतटिनीसैकते मातृगेहे।
दृश्यस्सोऽयं न खलु विबुधैरप्यहो तत्र नाथः
मन्दानां नः पथि नयनयोरत्र क्लृप्तो भवत्या॥ 3॥

शैले काननदुर्गमे कथममी गन्तुं क्षमा बालकाः
इत्येवं करुणारसार्द्रहृदया कान्तस्य कान्तं परम्।
वक्षस्तच्च विहाय पद्मसदने ! जाये ! वृषाद्रीशितुः
तस्याद्रेः किमुपत्यकापरिसरे वासं व्यधा नः कृते॥ 4॥

पराङ्मुखं नाम विधेर्विलासा -
    न्नतेष्वमुं सम्मुखमादधाना।
नाथं रमे ! तत्पुरतो निविष्टा
    तमीक्षसे किं करिशैलमूर्ध्नि॥ 5॥

सुन्दरवल्लि ! त्वामालिङ्गन्
    सुन्दरबाहुर्वनशैलेन्द्रः।
सुन्दरवदनस्सुन्दरवर्ष्मा
    सुन्दरनामा जयति पतिस्ते॥ 6॥

सीते ! मातर्वड्डुवूर्निलये !
    त्वत्तो नान्या मम गतिरस्ति।
त्वयि कृतमागश्शतमपि विदतः
    त्वत्कृतराक्षसवनितारक्षाम्॥ 7॥

यदुकुलपालकगोकुलबालक -
    कौतुकदायिनि ! रुक्मिणि ! माम्।
बालकपालककौतुकदारिणि !
    पालय पालय रुक्मिणि ! माम्॥ 8॥

हैयङ्गवीननटवक्षसि भासमाने !
    सौहित्यदूरललितामृतपार्श्वजाते !।
मातस्सुवर्णमयि ! मां मधुरैः कटाक्षैः
    हे लक्ष्मि ! शीतलतमैश्शिशिरीकुरुष्व॥ 9॥

श्रियस्स्तोत्रमिदं भव्यं श्रीमच्छ्रीनिधिना कृतम्।
श्रद्धया पठतां नित्यं श्रीरागच्छति मन्दिरम्॥ 10॥

॥ इति श्रीस्तोत्रं समाप्तम्॥